**श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्**

**सत्रान्तपरीक्षा – एप्रिल – २०१९**

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-6) | **प्रश्नपत्रम् – ०५** | **गुणा: -** ७० |
| **विषय: -** साहित्यम् | **कोड – C.**C. 3.6.1.1. | **समय: -** ११ त: ०२ |
| **दिनाङ्क: -** ०३/०४/२०१९ | **सन्दर्भग्रन्थः –** सहित्यदर्पण: | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १** निम्नेषु द्वयो: ससन्दर्भं व्याख्यां लिखत । १०

१.रसस्याङ्गित्वमाप्तस्य धर्मा: शौर्यादयो यथा ।

गुणा माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा ॥

२. उपर्यधो द्वयोर्वा सरेफष्टठडढै: सह ।

शकारश्च षकारश्च तस्य व्यञ्जकतां गता: ॥

३. माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ।

अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥

**प्रश्नः – २ साहित्यदर्पणानुसारं गुणनिरूपणं कुरुत ।** १०

**अथवा**

**सहित्यदर्पणानुसारं रीतिनिरूपणं कुरुत ।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ निम्नेषु द्वयो: ससन्दर्भं व्याख्यां लिखत ।** १०

(१)शब्दार्थयोरस्थिरा ये धर्मा: शोभातिशायिन: ।

रसादिनुपकुर्वन्तोऽलङ्कारास्तेङ्गदादिवत् ॥

(२)रूपकं रूपितारोपादिविषये निरपह्नवे ।

तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥

(३) गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन ।

यदि श्लेषेणाऽन्यथा वाऽन्यथयेत् साप्यपह्नुति: ॥

**प्रश्नः – ४ साहित्यदर्पणानुसारम् उपमालङ्कारनिरूपणं क्रियताम् ।** १०

**अथवा**

**साहित्यदर्पणानुसारम् उत्प्रेक्षालङ्कार: निरूप्यताम् ।**

## तृतीयान्विति:(Unit - 3)

**प्रश्नः –५  निम्नेषु द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** १०

१) सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना ॥

२) समासोक्ति: समैर्यत्र कार्यलिङ्गविशेषणै: ।
व्यवहारसमारोप: प्रस्तुतेऽन्यस्य वस्तुन: ॥

३) दृष्टान्तस्तु सधर्मस्य वस्तुन: प्रतिबिम्बनम् ।

**प्रश्नः –६  दृष्टान्तालङ्कारस्य सोदाहरणं निरूपणं क्रियताम् ।** १०

**अथवा**

**अर्थान्तरन्यासालङ्कारस्य सोदाहरणं निरूपणं क्रियताम् ।**

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः –७  अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तराणि लिखत ।** १०

१) साहित्यदर्पणस्य रचयिता क: ?

२) साहित्यदर्पणे कति परिच्छेदा: सन्ति ?

३) नवमपरिच्छेदे कि निरूपणम् अस्ति ?

४) गुणा: कति सन्ति ?

५) गुणानां निरूपणं कस्मिन् परिच्छेदे अस्ति ?

६) शब्दसाम्येन क: अलङ्कार: भवति ?

७) पूर्णोपमाया: कति भेदा: सन्ति ?

८) उपमाया: कति भेदा: सन्ति ?

९) समस्तपञ्चपदे बन्धे का रीतिर्भवति ?

१०) माधुर्यव्यञ्जकैर्वर्णै: का रीतिर्भवति ?

११) निर्माणकौशलं धातु: इति पद्ये क: अलङ्कार: अस्ति ?

१२)प्रतिवस्तूपमा कतिविधा भवति ?

१३)सति हेतौ फलाभावे क: अलङ्कार: भवति ?

१४)श्रुतं कृतधियां सङ्गात् इत्यादिपद्ये क: अलङ्कार: अस्ति ?

१५)विरोधालङ्कार: कतिविध: भवति ?

*****************